6. Hafta

# रामायण

अयोध्यायां दशरथः नाम राजा आसीत्। तस्य तिस्रः भार्याः आसन्। ताः क्रमेण कौसल्या, कैकेयी, सुमित्रा च। एतासु भार्यासु चत्वारः कुमाराः अजायन्त। तेषु प्रथमः रामः कौसल्यायाः पुत्रः।

द्वितीयः भरतः कैकेय्याः पुत्रः। तृतीय - चतुर्थौ लक्ष्मण शत्रुघ्नौ सुमित्रायाः पुत्रौ।

रामः पितुः आज्ञया वनं अगच्छत्। तेन सह लक्ष्मणः, सीता च अगच्छताम्। रावणो नाम राक्षसः वने सीतां अहरत्।

सः तां लङ्कानगरे अस्थापयत्। रामः कपिराजेन सुग्रीवेण, हनुमता च सख्यं अकरोत्। हनुमान् समुद्रं उल्लङ्घ्य लङ्कायां सीतां अपश्यत्।

वानराः समुद्रे सेतुं अबध्नन्। रामः लङ्कां गत्वा सर्वान् राक्षसान् रावणं च जघान। ततः सः सीतया सह अयोध्यां प्राप। अयोध्यायां रामस्य पट्टाभिषेकः अभवत्।